"अहमविन्द्यान्यानृषि" का० उ० । "अविन्त्याऽलाभेन" भा० । २ज्ञानाभावे च । न०ब० । ३लाभशून्ये ४ज्ञान-शून्ये च त्रि०अव्ययी०।५ज्ञानाभावे ६लाभाभावे च अव्य०।

**अवित्यज** पु० न विशेषेण त्यज्यते रसायनादिषु त्यज–कर्म्मणि बा०क न० त० । पारदे राजनि० ।

**अविथुर** त्रि० व्यथ–उरच् कित् तेन संप्रसारणम् वेदे न यस्य धः न०त०। अवियुक्ते । "अनानता अविथुरा ऋजीषिणः" ऋ० १,८७,१। "अविथुरा वियुक्ताः संङ्घी-भूता इति भा० लोके तु अविधुरइत्येव ।

**अविथ्या** स्त्री अवये हिता अवि+थ्यत् । अजाहितायां यूथौ

**अविदुग्ध** न० ६त० । मेषीदुग्धे ।

**अविदित** त्रि०न विदितः।१अज्ञाते ।२परमेश्वरे पु० "अन्यत्र विदितादन्यत्राविदितादन्यत्र कृताकृतादिति" श्रुतिः ।

**अविदाहिन्** त्रि० न विदाही न० त० । १असन्तापके २अदाहके च ।

**अविदूर** न०न०त० । १समीपे अनतिदूरे २तद्वर्त्तिनि त्रि० ।

**अविदूस** न०अवेर्दुग्धम् अवि+दुग्धे दूसच् न षत्वम्। मेषीदुग्धे।

**अविद्धकर्णी** स्त्री न विद्धः अच्छिद्रः पर्णरूपः कर्णोऽस्याः । पाठालतायाम् ।

**अविद्या** स्त्री न विद्या विरोधे न०त०। विद्याविरोधिनि १अ-ज्ञाने २ज्ञानाभावे च। अविद्या च न्यायमते ज्ञानाभावः। सांख्यादिमते ज्ञानप्रागभावापरपर्य्यायज्ञानानगतावास्था सा च पञ्च भेदा "अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः" इति पुरा० पञ्च पर्व्वाणि च "अविद्याऽस्मितारागद्वेषाभि-निवेशा" इति पात० सूत्रोक्तानि । तत्र "अ-नित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" पात० सू० । व्याख्यातञ्च तद्वृत्तौ यथा अविद्या "अतस्मिन् तद्बुद्धिरित्यर्थः अमरा देवा इत्यनित्येषु नित्यत्वभ्रान्त्या देवत्वार्थं कर्म कृत्वा बध्यन्ते, एवमशुचौ स्त्रीकाये शुचित्वभ्रान्त्या बध्यन्ते तदुक्तं भगवता व्यासेन "स्थानाद्बीजादुपष्टम्भान्निष्यन्दान्निधनादपि । कायमाधे-यशौचत्वात् पण्डिताह्यशुचिं विदुरिति" विण्मूत्रसङ्कुलं मातृ-उदरं स्थानं, शुक्रशोणितं बीजम्, अन्नपरिणामस्तु श्मादि-रुपष्टम्भः सर्वद्वारैर्मलानां स्रवणं निष्यन्दः। निधनं मरणम्। तेन हि श्रोत्रियकायोप्यत्यन्ताशुचिर्भवति आधेयशौचत्वं स्नानानुलेपनादिना शुचित्वापादनम्। तथा परिणामदुःखे भोगे सुखत्वभ्रान्तिः अनात्मनि बुद्ध्यादावात्मख्यातिः अविद्या तत्त्वविद्याविरोधिनीत्यर्थः। यद्यपि शुक्तिरूपाद्य-विद्याः सन्ति तथापि पञ्चविधैवाविद्या बन्धमूलमितिभावः" इयमविद्याऽदृष्टत्वेन नैयायिकैरङ्गीकृता "इत्येषा सह कारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता" कुसु० "यस्य शस्य सहकारि शक्तिः कारणम् एषा सहकारिरूपा माया असमत्वात् सर्व्वकार्य्यापेक्षणीयत्वात् दुरुन्नेयत्वसाहश्यात् माया-पदेऽदृष्टे लक्षणा । मूलत्वात् प्रकृतिः सैव, तत्त्वज्ञानप्रति-बध्यत्वात् सैवाविद्या उदिता उक्ता" हरिदासः । क्षणिकविज्ञानवादिनस्तु "अभिन्नोऽपि हि बुद्ध्यात्मा विप-र्य्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इत्युक्तदिशा क्षणिकविज्ञानमेवैकं तत्त्वं बाह्यं वस्तु नास्ति तथाहि बाह्यपदार्थाभावेऽपि मिथ्याज्ञानरूपयाऽविद्यया सर्व्वं वस्तु कल्पितमित्याहुः । तदेतत् सांख्ये निराकृतम् । यथा "नाविद्यातोऽप्यवस्तुना बन्धायोगात्" सू० "अविद्या-तोऽपि न साक्षाद्बन्धयोगः अद्वैतवादिनां "तेषामवि-द्याया अप्यवास्तवत्वेन तया बन्धायोगात् न हि स्वाप्नरज्ज्वा बन्धनं दृष्टम् । नच "न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता" इति "बन्धमोक्षौ सुखं दुःखं मोहापत्तिश्च मायया। स्वप्ने यथा-त्मनः ख्यातिः संसृतिर्न तु वास्तवी" इतिचोक्तेः बन्धोऽप्यवास्तव इति वाच्यम् विज्ञानाद्वैतश्रवणोत्तरं बन्धनिवृत्तये योगा-भ्यासविरोधात् बन्धमिथ्यात्वश्रवणेन बन्धनिवृत्त्यासिद्धत्व निश्चयात् तदर्थं बह्वायाससाध्ययोगाङ्गानुष्ठानासम्भवात्" भा० "वस्तुत्वे सिद्धान्तहानिः" सू० "यदि चाविद्याया वस्तुत्वं स्वीक्रियते तदा स्वाभ्युपगतस्याविद्यान्तत्वस्य हानिः" भा० । "विजातीयद्वैतापत्तिश्च" सू० । "किञ्चाविद्याया वस्तुत्वे क्षणिकविज्ञानसन्तानाद्विजातीयम् द्वैतं प्रसज्येत तच्च भवतामनिष्टम् । सन्तानान्तःपातिव्यक्तीनामानन्त्यात् सजातीयं द्वैतमिष्टमेव तैरित्याशयेन विजातीयेति । नन्वविद्याया अपि ज्ञानविशेषत्वादविद्यया कथं विजातीय-द्वैतमिति चेन्न ज्ञानरूपाविद्याया बन्धोत्तरकालीनतया वासनारूपाविद्याया एव तैर्बन्धहेतुत्वाभ्युपगमात् । वासना तु ज्ञानाद्विजातीयेतिभावः" भा० । "नासद्रूपा न सद्रूपा माया नैवोभयात्मिका । सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी" त्युक्तिमनुसृत्याशङ्कते "विरुद्धोभयरूपा चेत्" सू० "विरुद्धं यदुभयं सदसच्च ततो विलक्षणं वा तद्रूपैवाविद्या वक्तव्या अतो न तया पारमार्थिकाद्वैतभङ्ग इति चेदित्यर्थः। वस्त्ववस्तुत्वरूपसदसत्त्वयोः स्वमतसिद्धयोर्विरोधोनास्तीति